MSS No. 145 Subject Philosophy

Name of MSS तर्कसंग्रहटि Tarka Sangraha tikā

Author - -

Period - - Folios 29

Script Sanskrit Source Prithipal Singh

Missing Folios 008a & 009

तर्कसंग्रह : अपूर्ण
१६ पत्रक ॥ ल० अ० ८ पं० प्र० पू०

ह० ल०

145

145

ॐ श्रीगणेशाय नमः ॥ विश्वेश्वरं सांबमूर्त्तिं प्रणम्य गिरिजां गुरुं । टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकां ॥१॥ चिकी
र्षितस्य ग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकमिष्टदेवतानमस्कार
रूपं मंगलं शिष्यशिक्षार्थं ग्रंथतो निबध्नन् चिकीर्षितं प्रतिजानीते निधायेति । नन्वस्य मंगलस्य समाप्तिसाध
नत्वं नास्ति मंगले कृतेपि किरणावल्यादौ समाप्त्यदर्शनात् मंगलाभावेपि कादंबर्यादौ समाप्तिदर्शनात्
अन्वयव्यतिरेकव्यभिचारादिति चेन्न । किरणावल्यादौ विघ्नबाहुल्यात् समाप्त्यभावः । कादंबर्यादौ ग्रंथाद्बहि
रेव मंगलं कृतं अतो न व्यभिचारः । ननु मंगलस्य कर्त्तव्यत्वे किं प्रमाणमिति चेन्न शिष्टाचारानुमितश्रुतेरेव प्रमा

ॐ निधाय हृदि विश्वेशं विधाय गुरुवंदनं बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥१॥ रामाय ॥

णत्वात् तथाहि मंगलं वेदबोधितकर्त्तव्यताकं अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादिश्राद्धवत्
भोजनादौ व्यभिचारवारणायालौकिकेति रात्रिश्राद्धादौ व्यभिचारवारणायाविगीतेति शिष्टपदं
स्पष्टार्थं मनकुर्यान्निष्फलं कर्मेति ... नाटकादेरपि निबद्धत्वादिति तर्कसंग्रहः तर्क्यंते प्रतिपाद्यंते इति
तर्काः द्रव्यादिपदार्थास्तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रियते ... कस्मै प्रयोजनायेत्यत आह ।
सुखबोधायेति सुखेनानायासेन बोधः पदार्थज्ञानं ... तस्मै इत्यर्थः । ननु बहुषु तर्कग्रंथेषु सत्सु किमर्थमपूर्व

॥ विघ्नान्यूनसंख्याकबलवत्तरान्यतरमंगलाधिकरणवृत्तिकार्याभावकत्वेस्मैवान्वयव्यभिचारादितिभावः ॥६॥

॥ मंगलाचरणम् १॥ ॥ मूढाभिप्रायः ॥३॥

तास्याश्चेत्तत्वैतत्कं चारणांगुज्यते सैवन संभवतीत्या शंकते नन्विति व्यभिचारादि न्या
ति अन्वयव्यतिरेकव्यभिचारज्ञानस्य प्रतिबंधकसत्वान्नियतान्वयव्यतिरेक
सहचारनिश्चयरूपकारणासंभवेन न कारणत्वनिश्चय इत्यभिसंधिः ।
समाप्त्यभाव इति अतो न व्यभिचार इत्यनेनान्वयः विघ्नान्यूनसंख्याकस्यब
वैजात्यं प लवत्तरस्य वा सर्वमंगलस्य विघ्ननिरसनद्वारा समाप्तिसाधनत्वेन तादृश । ध्वंसकृप॥
इति६ मंगलाभावान्नान्वयव्यभिचारोभावः बहिरेवेति जन्मान्तरएवेत्यर्थः अत ॥
कुत्रचित्कृत्यकर्तुर्नास्तिकत्वेपि दृष्टत्वेति अतइति तादृशमंगलस्यविघ्नध्वंसद्वा
रासत्वान्नव्यतिरेकव्यभिचार इत्यर्थः एवं च कारणत्वसिद्ध्यतीति भावः परेत

॥ एतज्जन्मनि २॥

नं० टी०
प० २

अत उक्तं हेतुद्वयान्न व्यभिचारः नान्वयव्यतिरेकव्यभिचार इति व्याचख्युः मणिकृतस्तु
मंगलस्य विघ्नध्वंस एव फलं समाप्तिस्तु स्वसामग्रीवशादेवेत्याहुः एतत्तत्त्वमस्म-
पा ३॥ दीयचिंतामणिव्याख्यामनुसंधेयं मंगलस्य श्रुतिबोधितकर्त्तव्यताकत्वव्य- पर्वतो वह्निमानित्याका-रिकायाः॥४॥
वस्थापयितुं शंकते नन्विति अनुमितश्रुतेरेवेति अत्रायमाशयः श्रुतेर्वेदबोधि- साध्यत्वं ५॥
तकर्त्तव्यताकत्वरूपवक्ष्यमाणविधेयकोटिप्रविष्टत्वेपितदंतर्भावेन विधेयत्व- वह्निमाना…
सीक्रियते॥६॥ मभ्युपगम्यते तच्छ्रुतेरनुमितिपूर्वमसिद्धत्वात् एतेन वह्निसाध्यकानुमितिविषयत्वे-
विधेयतावच्छेदकतारूपाया नाभिमताया वह्निमत्वादिकमनुमिनोमीति व्यवहाराभावेन श्रुतावनुमितत्वव्यवहारः
३ कथमिति शंका निरस्ता श्रुतौ विधेयताभ्युपगमेन तादृशव्यवहारे बाधकाभा-
वात् एवकारो व्यर्थकः तेन मंगलं कर्त्तव्यं समाप्तिफलकत्वादित्यनुमानरूपप्र-

॥श्रुतिरनुमिता २॥

॥ तथा च मंगलत्वस्वबोधितकर्तव्यताकत्वसंबंधेन स्मृतिमत् अलौकिकाविगीतशिष्टाचारविषयत्वादिति ॥

॥ उक्तसंबंधेन स्मृतेः साध्यत्वेवव २ ॥ अनुमितिविधेयत्वं २

ता

ए१ स्मृतिसाध्यकानुमितौ २॥ वेदः

माणांतरसत्वेपि न द्वत्तिरिति अन्येतु स्वबोधितकर्त्तव्यकात्वसंबंधेन स्मृतेरेव साध्यता । १ विधिम सर्वविधिषु ...

म२ अग्निर्योग्यस्यौत्तरैवितात्वधर्मेवेच स्मृतेरनुमितत्वोपपत्तिरित्याहुः अलौकिकेति विधि

धान्न३ मेत्तेरागादिभिन्नेत्यर्थः अविगीतेति धर्मशास्त्रानिषिद्धेत्यर्थः शिष्टेति वेदोक्तता ।

त्वज्ञानेन वेदविहितकर्मकारीत्यर्थः वेदोक्ताहिंसादिकर्त्तरि वेदोद्वेतिव्याप्तिवार । निर्हिंसादिति ४॥

णायत्तृतीयांते आचारविषयत्वादिति आचारः कृतिस्तस्याः वृत्त्यनियामकविषय । साधेयता ५॥

हृति६॥ यतासंबंधेन हेतुताविवादग्रस्तेति तं हि विषयत्वस्य हेतुत्वेनानुधावनमिति भावः य । ज्ञानवान्यदृष्टिपत्ती त्यभावादिति भावः ॥ ७॥

ष्टाकर्महेतुविशेषणप्रयोजनमाह भोजनादावित्यादिना ननु अलौकिका ।

विगीताचारविषयत्वस्यैव हेतुतास्तु अशिष्टाचारविषये ताहशहेतोरसत्वेन व्य

पे१ भिचारसंभवादित्याशंकामिष्टापत्त्या परिहरति शिष्टपदमिति जलताडनादा ।

विवक्षणम् ६॥

...संबंधेन हृतित्रियामकत्वान्न हेतुताविवादग्रस्तेति ४॥ दूरीकरोति ॥

ने० टी०
प० ३

॥ आचारविषयत्वघटकं आचारपदमित्यर्थः २॥ ॥२॥ विधेयत्वं ... विषयत्वेतिभावः ॥२॥

वशिष्टाचारविषयेहेतोरसत्वंस्फुटयति नकुर्यादिति स्वर्गादिफलेव्यभिचारवारणाय।
चारविषयेति विधेयत्वं याचारविषयत्वार्थकमितिसंबंधः तर्कपदस्यारोपार्थकत्वमसंभवा तर्कसहकृतप्रमाणजन्यप्रमाविषयी क्रियंते ॥३॥
प्रमितिविषयत्वरूप रयितुं द्रव्यादिसाधारणं तर्कत्वं निर्वक्ति तर्कितेति उपादानरूपसंग्रहस्यासंभवादाह सं
पे ४ दैवेति स्वरूपकथनं स्वरूपज्ञानानुकूलः शाहुः एतावता द्रव्यादिपदार्थाः विषयाः पदा
र्थतत्वावधारणप्रयोजनं संबंधश्च प्रतिपाद्यप्रतिपादकभावः पदार्थतत्वावधारण या ॥ पा ॥
प्रकृष्टफलमुद्दिश्यप्रवृत्तिमानत्वंप्रेक्षावत्वं ॥५॥ कामोधिकारीति चतुष्टयं प्रेक्षावत्प्रवृत्त्यंगं सूचितम्‌ बधीतत्सुखमसाधारणमिह सुखे।
बा। नेति सुखबोधरूपप्रयोजनस्याव्यभिचारितस्यान्यतः सिद्धत्वेनैतद्ग्रंथकरणप्रयोजनता लीलावत्यां...
कांतानपाम्यतीत्याशयेनावतारयति नन्विति तेषां भाष्यादिग्रंथानां मूलेऽसत्त्वा।
त्वा।
घ। दार्था इति द्रव्यादिरूपायेसप्त ...पदार्थास्तदन्यत्वमेवतेः पदार्था इत्यर्थः अत्रसप्तमेवेत्तावु। त्वा।

त्वा॥ द्रव्यादित्वोपाधिभिन्नभिन्नवचनम्॥

॥ अन्यतोऽसिद्धस्यैवप्रयोजनस्यकांतमकत्वान्॥२॥

॥ इष्टसाधनतेति ... विनाप्रतीतिर्नभवेदितिभावः॥ ॥

३

त्वा।

म १ हि विशेषविषयत्वरूपत्वमेवाग्रिमग्रंथस्यापि पर्यवसानमवसेयं ननु सामान्यधर्मज्ञा
स्म २ नं विशेषजिज्ञासां प्रति हेतुत्वात्सामान्यलक्षणकथनानंतरमेव विभागो युक्तस्तथा
च मूले कथमादौ विभाग इति न्यूनतां परिहरति पदस्येति अर्थः अभिधेय उक्तो बु
तन्त्याय पदसंबंध्यभिधाविषयत्वस्य लाभेऽपि पदसंबंधित्वांशस्याव्यावर्तकत्वादा ऽऽ अतिव्याप्त्याघटकत्वा ॥ तू ॥ ८ ॥ ॥
ह अभिधेयत्वमिति लक्षणं लभ्यत इति शेषः तथा च न्यूनतेति भावः विभागादेव प नेय
॥ पाव ३ ॥ दार्थत्वावांतरधर्मपुरस्कारेण धर्मिप्रतिपादनादेव अधिकसंख्याव्यवच्छेदार्थत्वा
दिति नोद्देशसंख्यानिषेधसिद्धिफलकत्वादित्यर्थः उद्देश्यविधेयभावस्थले उद्दे
श्यतावच्छेदके विधेयव्याप्यत्वभानमौत्सर्गिकमित्याशयेनाह पदार्थत्वमिति

॥ अत्र तिप्रतिबंधके प्रवर्तमानविधेयत्वमौत्सर्गिकत्वम् बलवत्प्रमाणाप्रयोज्यत्वमौत्सर्गिकत्वम् ॥ १ ॥

॥ द्रव्यत्वभेदो गुणोऽपि च गुणत्वभेदो द्रव्यादीनां प्रत्येकं भेदस्य प्रसिद्धत्वेपि द्रव्ये ... दत्तद्रव्यत्वभेदो द्रव्यादिभेदसप्तकं नास्ति एवं च द्रव्यादिभेद ॥
॥ सप्तकं नास्तीति प्रतीतिबलात्तादृशभेदसप्तकस्य ... तादृशभेदसप्तक ... गृह्णातीति ॥ ३ ॥ ॥

न० टी०
प० ४

इति व्यवच्छेदार्थतादिति एतद्रूपो यो व्यवच्छेदो निरुक्तविशेषणस्तद्वैयर्थ्यादित्यर्थः सप्तभि
न्नभिन्नत्वमिति द्रव्यादयो ये सप्तपदार्थास्तत्तद्भेदकूटविशिष्टभिन्नत्वं वक्तव्यमित्यर्थः
द्रव्यादिभेदसप्तकाभाववत्त्वमिति द्रव्यादिभेदानां प्रत्येकं प्रसिद्धानां कूटस्य कुत्राप्य सप्तानां ३
सत्त्वेन तादृशभेदसप्तकत्वावच्छिन्नाभावस्य सर्वत्र सत्त्वान्न दोष इति भावः वस्तुतस्तु । लाघवादाह वस्तुतस्त्विति ४
पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमित्युक्तपदार्थत्वे द्रव्यादिसप्तसाध्यान्यत त्वा ५
मत्वव्याप्यमित्यर्थः एवं च बहुषु पुस्तकेषु सप्तान्यतमत्वाप्रसिद्धिशंका न तत्साध्या ।
न परस्य न तु सप्तान्यतमत्वमित्यादिग्रन्थस्यासत्वेपि न क्षतिरिति ध्येयं एवमग्रेपीति ए ।
वेरीत्या द्रव्याणीत्यादावपीत्यर्थः द्रव्यमिति जात्यैकवचनं मीमांसकमतं दूषयितु

द्रव्यत्वादिसप्तोपाधिभिन्नाद्द्रव्यादय स्तद्भिन्नाद्यन्यत्वाद पत्तद्व्याप्यमिति त्यर्थः ॥ ५ ॥ ॥

॥ जात्यभिप्रायेणैकत्वबोधकं वचनमित्यर्थः तथा च एकत्वविशिष्टं यद्द्रव्यत्वं तद्विशिष्टान्विभजत इति भावः ॥१॥

८

तथा च तत्प्रागभावावच्छिन्नविशेषणतया हेतोः कालत्वे विनिरवच्छिन्नविशेषणतया हेतोरसत्त्वा न्न व्यभिचार इति भावः ॥१॥ ॥ रामायनमः॥

॥ अन्यत्वसमानाजन्यप्रतीतिबलात् ॥१॥

॥ प्रतीतिरूपकारणादित्यर्थः ॥१॥

नमः ।

मैवन्नस्यति नन्वित्यादिना प्रतीतिबलात् प्रात्यक्षिकप्रतीतिबलात् तस्य द्रव्यत्वेऽनुमानं

प्रमाणयतेनोयतस्यति २ प्रमाणयति नीलरूपाधारतयेति समवायेन नीलरूपवत्तयेत्यर्थः तेन कालादिसंबं कार २

अपिरूपवत्त्वेपि ३ धेन तस्यापि स्पर्शवत्त्वेऽपि न क्षतिः एवमग्रेऽपि बोध्यं तत्र द्रव्यत्वे सिद्धे सति अतिरिक्तत्वे

प्राचीनमतानाश्रये ॥ ४ द्रव्यस्यापत्तिं तु नूतनद्रव्ये श्वेततमोभावं निराचष्टे तमस इत्यादिना अत एव रूपवत्त्वादेव ।

न वायाविति श्वेततमोभाव इत्यनुषज्यते संबंधभेदाभिप्रायेणाह स्पर्शाभावादि

ति इदं च ध्वंसप्रागभावाधिकरणे अन्यतमाभावो नाङ्गीक्रियते इति प्राचीनमताभि

प्रायेण अन्यथा समवायावच्छिन्नस्पर्शसामान्याभावस्य दैशिकविशेषणतया ।

वायावुत्पत्तिकालावच्छेदेन सत्त्वाद्व्यभिचरितत्वापत्तेः वस्तुतस्तु निरवच्छिन्न ।

दैशिकविशेषणतया तस्य हेतुत्वमिति ध्येयम् विषमव्याप्तहेतुमभिधायसम

॥ तत्रवायुभेदरूपपक्षाधा... ॥२॥

७२ हेतुतावच्छेदकसंबन्धभेदाभिप्रायेणेत्यर्थः तथा च रूपवत्त्वस्य हेतौ समवायो हेतुतावच्छेदकसंबन्धः स्पर्शाभावस्य हेतौ ... भावीयविशेषतासंबन्धः ॥ ५॥

॥ ... प्रागभावयोरन्यतमाभावेन सह विरोधमानाभावात् ... ॥२

॥ साध्यव्यापकत्वे सति साध्यव्याप्यत्वं विषमव्याप्तत्वम् साध्यव्याप्यत्वे सति साध्यव्यापकत्वं समव्याप्तत्वम् ॥ ॥१॥ ॥ रामायनमः॥

स्पर्शाभावस्य

॥ चैतांबं च चक्षुर्जन्यत्वानुरोधेन प्रत्यक्षलिङ्गेनाविविशेषः १॥

न० टी०
१०५

हेतु १॥

साध्येनं मोह सहायतीति सहायानिर्विशेषलौकीयक्षिपा उपसंहरति तस्मादिति लक्षणेष्वनंतमी ᳵ
वादित्यर्थः तेजोभावरूपत्वादिति नैदमप्रकाशकतेजोभावरूपत्वाद्गौरकारादित्यर्थः
यतस्तमस्वत्यविशेषणेनः परमाणवादिसत्वेन तेजःसामान्याभावसत्वेपि न वृत्तिः
ज्ञाणुकादिवारणाय प्रौढेत्यतिदिक्कू घटादौ व्यभिचारवारणाय आलोकाभावेहेतू ᳵ
नेति चक्षुर्ग्राह्यत्वे चक्षुर्जन्यज्ञानीयलौकिकविषयत्वं तेन तमसश्चाक्षुषत्वे घटादी
नघटादौ व्यभिचारः ६ नामप्युपनतमर्थादयाभावेपि न वृत्तिः विशेषाभावे दृष्टान्तयति आलोकाभाववदा
दिति आलोके विनारूपवत्वेन तमो विषयकचाक्षुषप्रमोदयादाह प्रमायामिति
कारणत्वादिति अन्यथांधकारस्य घटादेश्चाक्षुषापत्तेरिति दिक्कू ननु तमसस्ता ᳵ
दृशतेजोभावरूपत्वेन तमसि रूपवत्ताप्रतीतिः कथमिव त्ताप्रतीतिरित्यत आह कथमभावे रू

विशेषणतेजो विशेषणं आलोकविशेषरूपतया भावमित्यर्थः ॥६॥

॥ विषयतालौकिकत्वनिवेशेन ॥ ५॥

५

विशेषेणन

...स्तुय... [illegible] ...तेनधर्मे प्रकृते चक्षुरादिज्ञानाभावे कथं प्रतीतिरित्यत आह तमस इति तथा च चक्षुरादिज्ञानगौरव
ज्ञानान्यतरस्यैव [illegible] मत [illegible] प्रकृते गौरवं ज्ञानस्य सत्वाद्भ्रमत्वमिति भावः ॥ १ ॥ ॥ आदिपदेन [illegible] ॥ ३ ॥

प्रकाशाभावो [illegible] आह तमस इति तमसोऽतिरिक्तत्वेऽनन्तावयवतत्प्रागभावादिकल्प
ना गौरवं [illegible] त आह [illegible] तेजोभावरूपत्वे सिद्धे तीत्यविरोधात् [illegible] नी
भूतत्वं घटा [illegible] लक्षणज्ञानं विना नोपपद्यतेऽत आह द्रव्यत्वेति संयोगादिज
नकतावच्छेदकतया द्रव्यत्वजातिसिद्धिरिति भावः ननु तल्लक्षणे लक्षणतावच्छेदकघो
रभेदः स्यादत आह गुणवत्त्वमिति द्रव्यसामान्यलक्षणमिति एवं च सामान्यधर्मस्ता
कथनेन न न्यूनतापीति भावः दूषणत्रयरहितधर्मप्रकारकज्ञानत्वस्य वक्ष्यमाणलक्षणे
॥ ३ ॥ यात ज्ञानं विशेषणीभूतदूषणत्रयरहितत्वज्ञानं विना न संभवति दूषणत्रयरहि
तज्ज्ञानं तु विशिष्टदूषणत्रयज्ञानाधीने अभावबुद्धिं प्रति प्रतियोगितावच्छेदकवि
शिष्टप्रतियोगिज्ञानस्य हेतुत्वादित्याशयेन दूषणत्रयं दर्शयति लक्ष्यैकदेशाह

दूषणत्रयरहितत्ववि
शिष्टधर्मज्ञानम्

॥ अव्याप्तित्वादिदूषणं २ ॥ ॥ कारणत्वादित्यर्थः ॥ १ ॥

तथा च लक्षणतावच्छेदकताभिमतसंबंधावच्छिन्न
लक्ष्यवृत्तित्वाभाववच्छिन्नाभावो संभवः ॥२॥

॥ लक्षणतावच्छेदकत्वाभिमत २॥

तित्वमिति लक्षणतावच्छेदक[...]त्वाभिमतसंबंधेन किंचिल्लक्ष्यावृत्तित्वमर्थः लक्ष्य
मात्रेति मात्रपदं कात्स्न्यार्थकं संबंधविशेषावच्छिन्नलक्ष्यवृत्तित्वसामान्याभावस्फोरकं बोधकम् २
एकशफत्वे ३॥ एकशफत्वमिति न चात्रालक्ष्यवृत्तित्वरूपातिव्याप्तेरपि सत्वात्संकर इति वाच्यं दुष्टसंके
तेऽपि दोषासंकरादिति दिक् ॥ एतत्त्रयदूषणत्रयरहितमिति उक्तदूषणाभा[...]वैशिष्ट्ये
त्वर्थः नन्वसाधारणधर्मो लक्षणमिति हि सिद्धान्तलक्षणे[...]तो हि[...]णत्रयरहितो उक्तपम
धर्म इत्यत आह स एवेति इत्युच्यत इति श्राभिमुक्तेरितिशेष[...]नुसा[...]स्य लक्ष्या त्व६
लक्ष्यालक्ष्यवृत्तिभिन्नत्वस्येत्यर्थः ॥७॥ लक्ष्यवृत्तित्वरूपतयालक्ष्यभावरूपासाधारणत्वस्याव्याप्त्यादिदोषग्रस्तधर्मेऽपि
सा० २ सत्वात्कथं दोषत्रयरहितएवासाधारणधर्म इत्यत्राशंकोपरि[...]ऽसाधारणत्व
मन्यावृत्तित्वे निर्वेति लक्ष्यतावच्छेदकसमनियतत्वमिति लक्ष्यतावच्छेदकव्यापको

व्यादिनाऽसंभवस्य[...]यहः २=

॥ अव्याप्त्यसंभवयोः १

लक्ष्यतावच्छेदकव्याप्यत्वं ... लक्ष्यतावच्छेदकसमानाधिकरणात्यंताभावप्रतियोगित्वम् कपित्वत्वैकसकत्वयोर्गोत्वसमानाधिकरणात्यं ॥
ताभावप्रतियोगित्वरूप ... ऽच्छेदकव्याप्यत्वसत्त्वादतिव्याप्तिवारणायेत्यर्थः लक्षणे च समनियतत्वरूपव्यापकत्व ... सत्त्वे लक्ष्यतावच्छेदकसमानाधिकरणात्यंताभावाप्रतियोगित्वमत्यंताभावप्रतियोगितावच्छेदकत्व ... प्यत्वमु... ऽतिः

असाधारणधर्मत्वमित्य ॥ ॥ अधर्मपदं त्वित्यर्थः

कत्वे सति लक्ष्यतावच्छेदकव्याप्यत्वमित्यर्थः अव्याप्त्यसंभववा[illegible]योर्वारणाय सत्यंतं अ
तिव्याप्ति[illegible]वारणाय विशेष्य धर्मपदं तु लक्षणानाघटकसंबंधेन [illegible] ज्ञानादिता
त्पर्यग्राहकमिति भावः अत्रेदं बोध्यं एतेषां असाधारण[illegible]चस्य लिघटकाः अति नाशकाः ३
व्याप्तौ व्याप्यत्वस्य इतरयोश्च व्यापकत्वस्य भंगात् एते [illegible]दूषकाः [illegible]तेतु लक्षण
नैतन्मते समाधत्ते अतिव्याप्तौ व्यभिचारः इतरयोश्च भागा[illegible]सिद्धि[illegible]सिद्धीति
ननु लक्ष्यतावच्छेदकसमनियतत्वस्य लक्षणत्वे लक्षणस्य व्यावृत्तिः [illegible] प्रयोज
नमिति मिते व्यावर्तकस्यैव तादृशलक्षणलक्ष्यतया व्यावृत्तादौ वृत्तिव्याप्तिरित्या
शंकांत न्मतानुसारेणैव निराकरोति व्यावर्तकस्यैवेति इतरभेदानुमितिज

अन्यवहितैकदेशे सिद्धिर्दूषणमिति ॥ वः [illegible] सिद्धिरित्यर्थः ४

इतरभेदानुमितिः ६

॥ उदयनाचार्यमते ॥ ५॥

॥ उदयनाचार्य ॥

॥ दूरीकरोति ॥

॥ व्यावृत्तिर्व्यावर्तकस्येतरभेदः ॥ ७॥

त० टी०
पु०

त्रायमानं लिंगमनुमितिकरणमिति लिंगमनुमापकः इतरेभ्यो भिद्यते इति इतरभेदविधेयकानुमितिजनकतावच्छेदक ... विषयतावि शेषाश्रयत्व
स्वरूपं गम्यमानत्वादिमत्वेनत्वात् तस्य व्यावर्तकत्वमित्यर्थः ॥२॥ वर्तमानज्ञानविषयताविशिष्ट
लिंगेन उक्तानुमितिजनकता ॥

निषेधः २

नकस्यैवेत्यर्थः इतरभेदविधेयकानुमितिजनकतावच्छेदकविषयताविशेषाश्रयस्येति
यावत् एतेन व्यावहारिकस्य व्यवच्छेदः लक्षणत्वेनवादिलक्षणत्वे उक्तलक्षण
लक्षणस्य लक्ष्यत्वइतियावत् लक्ष्यत्वइतिपाठे व्ययमेवार्थो बोध्यः व्याहतत्वादिति
गवादीतरभेदे गोत्वादिरूपलक्ष्यतावच्छेदकसमनियतत्वस्याभिधेयत्वसमेयत्वा
दौ पदार्थे समनियतस्य च सत्वेनातिव्याप्तिवारणाय व्यावृत्तिमत्वं त्वभिधेय
त्वादिभिन्नत्वे च लक्षणलक्षणे निवेशनीयमित्यर्थः पर्यायेण व्यावृत्तेरपि व्यावहा
रिकत्वमप्यमाणतयातेनैव ... सहसंभवात् ... धानमनवि
तेतत्र ... हेतुमाध्ययोरेके हेतुमत्तानिरूपकालेमाध्य ... पयत्तना ॥

एवेनेयपिपाः २ (left margin)
व्यावृत्त्याभिधेयत्वादिनाप (left margin)
व्यावहारिकत्वेनैव २ ॥ (left margin)
त्व (left margin)

अभिधेयत्वेना
भिधेयत्वविशिष्टः
साध्यता
साध्यतावच्छेदक
मात्रविशिष्टलेन २ (right margin)

[illegible] (right-margin vertical commentary)

[illegible] (lower-margin commentary, seven lines)

न १ यान्यमतेः [illegible] इति प्राचीनमते इतरभेदस्य व्यावर्त्तकत्वाभावे [illegible] व्याप्तिः सिसा

धयिषायां [illegible] विशिष्टसिद्ध्यभावः पक्षतेति सिद्धान्ते मते तु व्याहृतेरि [illegible] व्यावर्त्तकत्वेन लक्ष्य नवीनमते २

तया नवीनलक्षणान्तर्गतमनस्य पक्षत्वेन नातिव्याप्तिः सिसाधयिषुत्वं पक्षत्वं [illegible] नमितिज्ञेयम्

सामान्यपक्ष ३ ॥

ननु किमिदं व्यावर्त्तकत्वं लक्षणलक्ष्यतावच्छेदकव्यावर्त्तकत्वं [illegible] सामान्यतो भेदानु

पक्षत्वा:

मापकत्वं व्याहृतस्य भिधेयत्वादेरपि यत्किंचिद्धर्मावच्छिन्नप्रतियोगिताकभेदानुमा

अत्र स्मणीयव्याप्तः सत्रम
पत्रैर्विशिष्टस्य नेकतमम
नात ॥

पकत्वेन लक्षणलक्ष्यतावच्छेदकत्वापत्तेः अतिव्याप्तिकपत्तासंगतेः एवं च सामान्यव्याप्तिघटकमा

णां च किंचिद्व्यावर्त्तकतया साध्याभावघटकव्यापकत्वादिवैयर्थ्यापत्ता स्वेनापि विशि

ष्टतत्तद्धर्मावच्छिन्नेतरभेदानुमापकत्वेन व्याप्तिगोत्वावच्छिन्नेतरभेदानुमापकस्य सा

व्यावर्त्तकत्वमितिपूर्वपक्षः १ ॥

स्या। अनुमितिजनकत्वं ४ ॥

गोत्वादीतरत्वलक्षणावच्छेदकधर्म ॥

न० टी०
प्र० ८

सास्नादिमत्त्वं गोत्वावच्छिन्नेतरभेदानुमापकं
गोत्वसमनियतत्वात् इत्यत्र ॥५॥

गोत्वावच्छिन्नेतरभेदानुमापकत्वात् ॥२॥

स्नादिमत्त्वस्य गोत्वसमनियतत्वं लक्षणमित्येवं रीत्या विशिष्य तन्न लक्षणमस्य वक्तव्यं तु पागो
न ४ त्वादिरूपलक्ष्यतावच्छेदकं तद्धर्मसमनियतस्य गोत्वावच्छिन्नेतरभेदादिस्वरूपव्याप्तेर्लोस ८ विशेषधर्म ३॥
त्वेनानियमात्तैः संभवेऽप्यभिधेयत्वादावतिव्याप्त्यलग्नकत्वाय तद्धेतुत्वोरत्वात् गोत्वादिसम
अभिधेयत्वादौ ६॥ नैयत्य...वासत्त्वादित्तिचेन्नैवं यतः सास्नादिमत्त्वे पत्नीकृत्य गोत्वावच्छिन्नेतरभेदा ८
नुमापकं...साध्ये विशेषव्याप्तावन्वयदृष्टान्तालाभेन पक्षे...समनियतत्वे तेन द्वे ८ सामान्यमुखव्याप्ति तत्रेति पदस्य अभिधा
च्छिन्न...मिति...या सामान्यमुखव्याप्तेरनुपगन्तव्यत्वात्...सिद्धसाधनापत्ते इत्यनेनान्वयः ३॥
हि व्याप्ति...व्याहृत्य अभिधेयत्वे पाः तत्तद्धर्मसमनियत...रूपप्रकृतहेतुत्व ८
गोत्वावच्छिन्नेतरभेदानुमापकत्वस्य = ल्यहेत्वोः...चेन्न प्रकृतसाध्यस्य तत्तुल्यस्य वा साध्यस्याप्रसिद्धेर्व्यभिचारः स्या ८
गोत्वसमनियतत्वरूपोपाधेः ...हेतुस्तत्तुल्यस्य...तद्धर्मसमनियतत्वरूपस्यान्यथेः ॥१= तद्धर्मावच्छिन्नेतरभेदानुमापकत्वस्य १=

तथा च तत्त्वविनिवेद्यत्वगुणत्वह ... ननाधिकसा... तरभेदत्वनिरुत्तरभेदत्वविशेष्यतावच्छेदकनिरूप्ययेपिनसिद्धसाधनं यादृशसिद्धिविषयत्वेन सिद्धता ... वैर
दृशसिद्धिविषयत्वेन स... तेनैवतदा ... सिद्धसाधनं भक्तो चेत्तरभेदविशेष्यकसिद्धिविषयत्वेनगुणे तरभेदस्य सिद्धत्वेपि उणधर्मिकसिद्धिविषयत्वेनासिद्धत्वान्न सिद्धसाधन
गुणे २ समवायेनेति शेषः ॥१॥ः

समवायसं ... ना ... धकत्वापेनैव गुणो गुणवत्ताव्यवहारोपपत्तौ तत्रालं कृत्र गुणत्वकल्प
नेन संभवदि ... रत्नादिविभावः सामान्यवानिति सामान्यवत्त्वं समवायेन बोध्यं तेनकाल १ न २
कादिसंबंधेन तत्तद्वृत्तित्वेप्यसेऽतिव्याप्तिः गुणइति लक्ष्यनिर्देशः लाघवादाह गुणत्वजाति शरीरकृतलाघवान् ३॥
त्वेति यद्यपि लक्षणलक्ष्यतावच्छेदकयोरभेदस्तथापि लक्षणेनेतरभेदे साध्ये हेतौ साध्य क ५
सामानाधिकरण्यनिरूपयेपि हेतुधर्मितावच्छेदके साध्यनिरूपस्यानियतत्वाभिप्राये। गुणइतरेभ्यो भिद्यतेइति निरूपस्य ॥५॥
णोदमितिसंहेप्य ... एवमग्रेपि बोध्यं गुणत्वजातिसिद्धिस्तु गुणपदशक्यतावच्छेदकतयेति।
गुणादीधितौ महाचार्याः नचैवं विभुपदशक्यतावच्छेदकतया विभुत्वमपि जातिः सिद्ध्येत्।
दितिवाच्यम् मूर्तत्वसंकरस्य बाधकस्य सत्त्वेन तस्य जातित्वासंभवात् जातित्वाभि

बहिरिंद्रियग्राह्यविशेषगुणवत्त्वं मूर्तत्वम् ॥१॥ गुणपदनिष्ठशक्तेतानिरूपि ॥ शक्तिप्रतिपाद्यता ३॥
असतिप्रतिबंधके पदशक्यतावच्छेदकतया जातिसिद्धिः संकरस्य बाधकस्य सत्त्वाद्विभुत्वे न जातिरित्याह मूर्तत्वसंकरस्येति ॥२॥ = नागुणपदार्थनिष्ठा शक्यता किं
चिद्धर्मावच्छिन्ना ... शक्यतात्वात् द्रव्यपदार्थनिष्ठशक्यतावत् ॥३॥ =

विशेष्यतावच्छेदक ॥५॥ ... नातिरिक्तो हेतुविषयस्येव वच्छेदकत्वनियमान्नरूपत्वाद ... नहेतित्वात् सत्तायां तदपे ... यास्त्रधिकहेतित्वान्नसत्तिवि
तिभावः ३ =

[illegible]

जात्याप्यगोज्ञात्वेव्यावर्तकत्वादितिभावः॥५॥

एवमग्रेऽप्यर्थकः।।

ते० दी०
प्र० १०

मतसंकरस्यैवजातित्वबाधकत्वात् तथाचोक्तं द्रव्यकिरणावल्यामुदयनाचार्यैः व्यक्तेरभेदस्तु-
ल्यत्वंसंकरोऽथानवस्थितिः रूपहानिरसंबंधो जातिबाधकसंग्रहः ॥१॥ व्यक्तेरभेदः स्वाश्रय
व्यक्तैरैक्यं आकाशत्वादेर्जातित्वबाधकं व्यक्तेस्तुल्यत्वमन्यूनानतिरिक्तव्यक्तिकत्वं घटत्वकल
शत्वयोर्भिन्नजातित्वेसंकरः परस्परात्यंताभावसमानाधिकरणयोरेकत्रसमावेशः मूर्तत्व
मूर्तत्वा[illegible]त्वे अनवस्थाजातित्वादेर्जातित्वे रूपहानिः स्वतोव्यावर्तकत्वात्मकरूपस्यहानिः
विशेष[illegible]जातित्वे असंबंधः असमवेतत्वे अभाववत्त्वादेर्जातित्वे इतिसंक्षेपः लघुत्वादीनां प्रा-
माणिकत्वे[illegible]पेक्षत्वस्याभावोन्याप्यइतिसमाधत्ते लघुत्वस्येति संयोगासमवायिकारण-
संयोगेऽतिव्याप्तिवार[illegible]णाय संयोगाभिन्नत्वेतीति संयोगासमवायिकारणद्रव्येऽतिव्याप्ति-
कारणपदसमवायि[illegible] भ्रमणादेरित्यादिनारेचनस्पंदनोर्ध्वज्वलनतिर्यग्गमनानांसंग्र-

मूर्तत्वे विहाय मूर्तत्वं मन
सि मूर्तत्वे विहाय मूर्तत्वेन
नत्वे उभयोः समावेशः २
स्थिरमाविचलत्वपदेषु विहि
तालत्वान समन्वयः ५

इतित्वम ५
स्वरूपस्य ५॥

रूपत्वेनिरूप्यतेज्ञायतेव[illegible]इतिमुन्यस्यारूपं[illegible]तंनस्यहानिः विशेषत्वं च नित्यद्रव्यवृत्तित्वे सति सामान्यभिन्नत्वे सति समवेतत्वम् ५
[illegible]॥६॥
प्रतियोगितानुयोगितान्यतरसमन्वय

१०

स्वतंत्रेच्छस्येत्यस्यैव विव[illegible]णीनि चेत्यर्थः २

हः गमनेनैतदुक्तं भवति न द्रव्यगुणादीनां समवायिनामनेनैतं भावोऽस्तीति शंकनीयं स्वतंत्रेच्छस्य नियो
गप्रयेनुयोगात्मकहेतुरपि संमतत्वादिति भावः परमित्यादि लक्षणमंगमूलकत्वेनैव वक्ष्यते
ऽतिनव्यनु[illegible] घटपटसमवायः द्रव्यत्वाद्यपेक्षयाऽधिकदेशवृत्तित्वेन परत्वमेव घटत्वादीना
न्यूनदेशवृत्तित्वात् परत्वमेव द्रव्यत्वादीनां सत्तातोऽपरत्वं घटत्वादिभिः परत्वमिति विवेकः स
मवायस्य भेदो नास्तीति न च समवायस्याऽभेदे स्पर्शसमवायवति वायौ रूपवत्ताप्रती

पत्रिमपृत्तितत्वविशिष्टसंबंधो घ २
वर्तते तत्र तत्तदनुत्ताप्रतीतिर्जायते —

रूपसमवायस्पर्शसमवा
यवो रैक्यादिति भावः ६ =

तिः स्यादिति शंक्यं रूपसमवायसत्वेऽपि रूपाभावेन तथा प्रतीतिरभावादिति दिक् पृथिवी
लक्षणस्य प्राथम्ये बीजमाह तत्रेति पृथिव्यादिमध्ये इत्यर्थः गंधसमवायिकारण ४३
तावच्छेदकतया पृथिवीत्वजातिसिद्धिरिति बोध्यं नाम्नेति अत्र तृतीयार्थोऽभेदः संकीर्तन
पदार्थप्रतिपादकशब्देनेति तथा च वस्तुप्रतिपादकनाममात्रमुद्देश इति लक्षणपर्यव

न० द्री०
प्र० ११
प्रमेयत्वादिना २=

लक्षणे।

स्येति अत्र घटइतिलौकिकपदेऽतिव्याप्तिवारणाय वस्तुपदं लक्षणीयवस्तुपरं लक्षणीयस्य पृ-
थिव्यादेः सामान्यतः प्रतिपादके प्रमेयपदेऽतिव्याप्तिवारणाय नामपदं लक्ष्यतावच्छेद-
कावच्छिन्नपरं लक्षणवाक्ये नामसत्त्वादतिव्याप्तिरतोमात्रमिति तिष्ठेयं आरब्धे जन्ये
परस्परविरोधेनेति सुरभिगंधं प्रति असुरभिगंधस्यासुरभिगंधं प्रति सुरभिगंधस्य
प्रतिबंधकत्वेनेत्यर्थः प्रतीत्यनुपपत्तिरिति अतश्चित्रगंधएवाप्रतिबध्यः स्वीके
तैव्य पृथि[illegible]गवः [illegible]वयवगंधस्यैवेति स्वाश्रयसमवेतत्वसंबंधेनेत्यादिः तुष्यनुद्भुजेन इति
न्यायेनाभीष्टकाहृ [illegible] कंचेति जलत्वादिकमादायातिव्याप्तेर्वारणाय गंधसमानाधि-
करणेति सं[illegible]रणाय द्रव्यत्वापरेति द्रव्यत्वन्यूनवृत्तीत्यर्थः केतेन द्रव्यत्वव्युदासः
गंधप्रती[illegible]ति पृथिवीजलमित्यादिप्रतीतेरित्यर्थः पृथिवीगंधस्यैवेति स्वाश्रयस-

११

ननु निरुक्तरूपेण तस्यापि गिरिकहेतित्वाद्दैवघटितत्वेन गुरुत्वाच्चेति भावः ३=

पृथिवीपरमाणुलक्षण ४=

युक्तत्वसंबंध[illegible]व्याप्तिः तच्च जलादौ पर्याप्तमतः तद्ग्राहीकस्य न शंकते ननु तथापीति अननुगत
रूपेण लक्षण[illegible]टकसंबंधान्निवेशप्रकालानवति व्याप्तिं वारयति संबंधान्तरेति वस्तुतस्तु
समस्तपादीनां संबंधा यत्वादिनैव समगतया तेनैव रूपेण तत्तत्संबंधस्य लक्षणघटकत्व॰
बोध्यं नित्यपृथिवीत्वादिरूपलक्षणानुगतनित्यत्वादिघटकं दर्शयति नित्यत्वमिति प्रकारान्त
रेणेति पृथिवीमित्यनुवध्यते अत्र नित्यपृथिव्याः शरीरेन्द्रियभिन्नत्वरूपविषयलक्षणा॰ ss
क्रान्तत्वेन विषयानुगतत्वमिति पृथिव्यास्त्रिविधत्वमतएव मूले तु न त्रिविधेत्युक्तिः संगच्छ
ते इति ध्येयम् केचित्तु अनित्यपृथिव्याएव त्रैविध्यं वर्णयति उद्देशक्रमानुसारेणाश्रयम॰
शरीरलक्षणमाह आत्मन इति आपतेन अवच्छेदकेन याच माह शरीरलक्षणं संपन्नता॰
हेशमाह यदवच्छिन्न इति सुखदुःखान्यतरसाक्षात्कारावच्छेदकमिति यावत् अत्रोत्याववयवि
त्वेसतीति विशेषणादेयं तेन पादादीनामवच्छेदकत्वेपि तत्र नातिव्याप्तिः शरीरत्वेन जातिः

पृथिवीमात्रस्यैवननत्व
नित्यपृथिव्याः ६=

द्रव्यानारंभकत्वम् २ः

तेषां मते कार्यत्वे सति उपभोग
साधनत्वं विषयत्वम् ४=

नं० टी० प्र० १२

विशेषपदकृत्यं कालतु भूमिकां रचयति उद्भूतत्वादिना ३ =

पृथिवीत्वादिना संकरात् २ =

पृथिवीत्वादिना संकरात् तस्यैन्द्रियत्वं न जातिरित्याशयेनाह शब्देतरोद्भूतेति आत्मादावेवेति
व्याप्तिवारणाय सत्यंतं श्रोत्रेऽतिव्याप्तिवारणाय शब्देतरेति चक्षुरादावनुद्भूतविशेष १
गुणस्य रूपादेः सत्वेनाव्याप्तिवारणायोद्भूतेति उद्भूतत्वं न जातिः शुक्लत्वादिना संका
रात् न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम् चाक्षुषादावुद्भूतत्वादिनाकार
णत्वानुपपत्तेः किंतु शुक्लत्वादिव्याप्यमनुद्भूतत्वं तत्तन्नानातत्तदभावकूटवत्त्वम्
उद्भूतत्वं तच्च संयोगादावपि तथा च शब्देतरोद्भूतगुणसंयोगाभावसमवायवारणा
य विशेषेति कालादावतिव्याप्तिवारणाय विशेष्यदलम् तत्रैवातिव्याप्तिवारणाय
य ज्ञानकारणमिति प्राचीनमते विषयावयवेन्द्रियावयवसंयोगस्य प्रत्यक्षजनके
तया तदाश्रयस्येन्द्रियावयवस्य नवीनमते कालादौ रूपाभावप्रत्यक्षे सन्निकर्ष १
घटकतया कारणीभूत चक्षुःसंयोगाश्रयस्य कालादेस्सवारणाय मनःप

जिज्ञासितं तु सिद्धांत सिद्धिरिति पाठः ॥४=

मार
प्राचीननवीनमतभेदेन मनः पदकृत्यं सूया चीनेत्यादि ॥३=

संकरस्य यान्ना नात्वमित्यर्थः =५=

चक्षुःसंयुक्तविशेषणता ३=

कालादावेव ४=

कालेरूपं नास्तीत्याकारके २=

तथा च शुक्लत्वादिव्याप्योद्भूतत्वस्य शुक्लत्वादिकं
विहाय परिमाणादावतिव्याप्तिकत्वं नवीनमते २=

कुत्राप्यसत्वान्न संकर इति भावः ॥३= दूरूपयति वैधर्म्यसत्वात् ॥

सप्तपदार्थीज्ञानायप्रकरणाय २=

दे न चाऽऽत्मान्यत्वे सतीत्यनेनैवाऽऽत्मान्यतिव्याप्तिवारणसंभवे किं गुरुतरशरीरेत्यादिविशेषणे
नेति वाच्यं तथा सति चर्ममनःसंयोगस्य ज्ञानमात्रे प्रति हेतुत्वमते तत्रातिव्याप्तेरित्यल चर्मत्वेति २=
मति विस्तरेण एवं चेति तत्तद्देहस्य शरीरादिसामान्यलक्षणत्वे चेत्यर्थः ननु गंधवत्
निर्दुष्टत्वे ४ त्वप्रवेशेनैव तल्लक्षणस्य सामंजस्ये गंधग्राहकत्वनिवेशमनुचितमेवं च इंद्रियं गं
प्प ५ धग्राहकमिति मूलमनुपपन्नमित्याशंकां परिजिहीर्षुस्तन्मूलस्य प्रयोजनं कथ घ्राण पं=
नपरतया व्याचष्टे गंधग्राहकमितीति उत्तरत्र इंद्रियं रसग्राहकमित्यादौ घ्रा
तस्य शेषसमानाधिकरणेति अत्र विशेषणप्रयोजनं पूर्वोक्तरीत्याह्यं जलत्व
जातिसिद्धिस्तु स्नेहजनकतावच्छेदकतयेति बोध्यं अन्यत्सर्वं पूर्वरीत्येति नित्य
त्वादिकं जलशरीरादिलक्षणे च गंधवत्त्वस्थाने शीतस्पर्शवत्त्वं निवेश्योह्यं

समवायेन जन्यस्नेहं प्रति तादात्म्येन जन्यजलत्वं कारणमिति कार्यकारणभावः तथा च जन्यस्नेहत्वावच्छिन्नजन्यतानिरूपितजन्य
जलनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् कपालनिष्ठघटकारणतावत् तज्जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया

नं० टी०
न० १३

विजातीयपीतरूपस्वीकारे चेद् = तेजोजन्यतावच्छेदकतया सिद्धो जातिविशेषः वैजात्यम् अ प =
पृथिवी वृत्ति पीतरूपभिन्नम् व प =

थिवी निरूपणेऽङ्गारीत्यर्थः एवमग्रेऽप्यूह्यं मूले स्वविंधनमिति आपणवं इंधनमद्दीपनेय
स्य तदित्यर्थः भुक्तस्येति भुक्तस्यौदनादेः परिणामः पाकस्तं च हेतुरित्यर्थः आकरजं
मिति आकरः खनिस्तत्र जातमित्यर्थः सुवर्णस्य तैजसत्वे व्यवस्थापयितुं शंकते
दीपिकायां नन्विति पार्थिवत्वसाधकपीतत्वहेतसुक्त्वा तैजसत्वाभावसाधको
हेतुमाह गुरुत्वादिति एतेन सुवर्णरूपे तेजसि विजातीयपीतरूपस्वीक्रियते पी
ते सुवर्णे क्लिष्टे बाधितप्रत्यक्षप्रतीतिबलात् एवं च तैजसत्वस्य निर्बाधितया पृथिवी
त्वेन सिद्धातीतिकस्य चिद्दूषणातिनिरस्ता गुरुत्वस्याप्रत्यक्षत्वेन तथा वक्तुमशक्य
त्वादितिदिक् सुवर्णस्य पीतेमगुरुत्वाश्रयतोऽतिरिक्तत्वव्यवस्थापयिष्यन्नपूर्वस्य

पृथिवीभागाद् र = माणानुमानेऽपयोजकत्वशंकावारणाय कार्यकारणाभावमनुकूलतर्कं

सुवर्णरूपे तेजसि विजातीयगुरुत्वं ... सुवर्णे क्लिष्टे बाधितप्रत्यक्षप्रतीतिबलात् एवं च तैजसत्वस्य निर्बाधितपाऽतैजसत्वं

[illegible] ॥

नैमित्तिकद्रवत्वेत्यर्थः तेन जलपरमाणोर्नातिव्याप्तिः सिद्धैकद्रवत्ववत्त्वे विवक्षितमिति भावः ॥ पृथिवीभागः ॥ ५=

अवस्थापयति अत्यंतानलेति सुवर्णस्येत्यादि अनुमानप्रयोगस्त्रिविधमवसेयः सुवर्णमपा
र्थिवे सति प्रतिबंधके अत्यंतानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात् प
नैवं तन्नैवं यथा पृथिवी जलमध्यस्थघृतादौ व्यभिचारवारणाय सति प्रतिबंधक इति
अग्निसंयोगे सति समानाधिकरणद्रवत्ववति घृतादौ व्यभिचारवारणायात्यंतानल
संयोगे सतीति द्रवद्रव्यान्तरसंश्लिष्टादिति अत्यंतानलसंयोगीयोपीति माश्रयः द्रवत्वना
तेजोभागः ६= प्रतिबंधकद्रवद्रव्यान्तरसंयुक्तः अत्यंतानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वा
धिकरणत्वे सति गुरुत्वात् जलमध्यस्थघृतवदित्यनुमानेनैतत्सिद्धिं दृष्ट्वा ज
लादिकमादायानुमानपर्यवसानं वारयति नैमित्तिकेति नन्वस्य स्पर्शभास्वररूप
योरुपलब्ध्यभावेन सुवर्णस्य तैजसत्वमनुपपन्नमित्यत आह तस्येति प्रतिबं

सुवर्णस्य तैजसत्वसिद्धिरिति भावः ३=

बलवत्सजातीयसंवलनं द्वेषः १ः

मीमांसकमतेवायुः प्रत्यक्षः नैयायिकः स्वमतेदर्शयति २ः

न० टी०

प्र० १५

हृदिप्राणोगुदेऽपानः समानो नाभिसंस्थितः उदानः कंठदेशस्थो व्यानः सर्वशरीरगः ॥२ः

घादिति हेतुविधायेत्यर्थः शारीरेत्तोति तथाच प्राणस्य विषयेतमीवइति भावः स्थानभेदादि।
ति हृदिप्राणाइत्यादिकोश्रोक्तस्थानभेदादित्यर्थः स्वमतेदर्शयति स्पर्शानुमेयइति ग्र
स्य उपलभ्यमानस्य स्पर्शस्याश्रयः पृथिव्यादीन चेत्यन्वयः चक्षुष्पत्वमिति इदं भौकाशादि
प्रत्येकभेदसाधनाभिप्रायेण सर्वेषोपलब्धिप्रसंगादिति स्पर्शस्येत्यादिः ग्राकाशा।
दीनां विभुत्वादिति भावः प्रत्यक्षः बहिरिन्द्रियजन्यप्रत्यक्षविषयः अनुद्भूतस्पर्शाश्र
येत्वेति दृष्टिव्यभिचारवारणाय प्रत्यक्षेति उपाधित्वादिति तथाच हेतावुपाधिव्यभि
चारेण [illegible] व्यभिचारोन्नयनसंभवान्न प्रत्यक्षत्वसिद्धिरिति भावः ननु तादृशप्रत्य
क्षत्वस्य रूपाद्वावपि सत्वेन तत्रोद्भूतरूपाभावेन साध्याव्यापकत्वात्कथं तस्योपा
धित्वमित्यतआह पक्षेत्यादिना तथाच पक्षधर्मावच्छिन्नसाध्यव्यापकोयमुपा
धिरिति भावः एवं प्रत्यक्षस्य स्पर्शाश्रयस्यापयुद्भूतरूपाभावेन प्रत्यक्षत्वानंगीकारे ग्र।

हेतुकोटाविविशेषः ६ः

तेन ग्राकाशादिचतुष्टयानाश्रितत्वे तदेकस्मिन्नाश्रितत्वस्य स्पर्शस्य स्थितिः कस्यचिच्च्युतिः तिरस्का॥३ः

बहिरिन्द्रियजन्यः ४ः

साध्यत्वेनाभिमत ५ः

[illegible]

प्रत्यक्षस्य स्पर्शाश्रय स्योद्भूत रूपवत्वेन सोपाधिकत्वे च॥

प्रत्यक्षस्य स्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचा[illegible]व्यभिचा[illegible]तद्व्याप्यव्यभिचारी॥

त्वात १५

साध्यासाधकमित्यर्थः ९ =
अनुकूलतर्काभावादिति भावः = नास्तिकाशंकासरः =

प्रत्यक्षत्वापत्तिस्तत्रोद्भूतरूपाभावादिति भावः ननु परमाणुपुंजस्यैव घटादिरूपत्वेनातिरिक्ता
वयविनोऽसत्वात्पृथिव्यादिचतुष्टयस्य नित्यानित्यत्वाभ्यां विभागाकथनमनुपपन्नमित्याशं पर
कांवा [illegible] इदानीमिति पृथिव्यादिचतुष्टयनिरूपणानंतरमित्यर्थः द्व्यणुकस्य नाश
इत्यस्य परमाणुद्वयसंयोगनाशादित्यादिः सर्वत्रेति जन्यद्रव्यसामान्य इत्यर्थः सर्वत्रै
करीतिरेवौचितेति भावः चाक्षुषद्रव्यत्वादिति चाक्षुषत्वे सति द्रव्यत्वादित्यर्थः रूपादौ ।
वात्मनि च व्यभिचारवारणाय विशेष्यविशेषणे न चैवमप्रयोजकमिति शंकां चाक्षुष
प्रति कारणस्य महत्त्वस्य त्रुटौ वैयदितनतया सावयवत्वे विनाऽवयवसंख्याजन्यस्य
तस्य स्वीकर्तुमशक्यत्वादिति संक्षेपः यत्किंचिद्द्रव्यध्वंसस्येदानीमपि सत्वात्सर्वेति ।
नित्यद्रव्याणां ध्वंसाभावात्कार्येति परमाणुनिष्ठरूपादीनां तदानीमपि सत्वाद् ।

ननु चाक्षुषद्रव्यत्वं चक्षुरिं
द्रियजन्यप्रत्यक्षविषय
द्रव्यत्वं तच्चात्मन्यप्य
स्तीति व्यभिचारः तत्रवा
वयवत्वरूपसाध्याभावा
दिति भावतारयति चाक्षु
षद्रव्यत्वेति प =

महत्त्वस्य २ =

परमाणुक्रियानाशं
प्रतिसम्मवायिकार
णनाशस्य हेतुत्वा
द्वा सोऽद्वावत्वं विहाय द्
व्यत्वस्य पातनस्य ८ =

पाकजन्यानां १ = अवांतरप्रलयेपि १ =

अणुके २ =

त० टी०
प्र० १५

निरुपाधिकव्यवहारस्यैव भेदसाधकत्वमिति भावः २=

ध्येति ध्वंसानां ध्वंसासंभवेन महाप्रलयेऽपि सत्त्वात् भावेतीति दिक् शब्दगुणकमित्यत्र श
ब्दवदिति वक्तव्ये तथाकथनमाकाशे शब्द एव विशेषगुण इति सूचनाय घटाकाशो
महाकाश इत्यादिव्यवहारस्योपाधिकृतत्वेनासाधकत्वादाकाशस्यानेकत्वे प्रमाणा
नेत्याह भेद इति एकत्वादिति आकाशस्येत्यादिः नन्वेकत्वेऽपि विभुत्वमस्त्वत
आह सर्वेति सर्वदिगवच्छेदेनेत्यर्थः परिच्छिन्नपरिमाणवत्त्वमिति यद्यपि परि
च्छिन्नत्वस्योपकर्षो अप्रत्वात्सकलपरमाणोर्महत्त्वेन द्व्यणुकपरिमाणापेक्षया
परमाणुपरिमाणस्यापकृष्टत्वाभावात्परमाणुष्वव्याप्तमिदं लक्षणमित्युच्यते
तदाप्याह क्रियावत्त्वमिति वस्तुतस्तु लाघवमेवोत्तरकल्पानुसरणबीजमिति
ध्येयं अतीतादिव्यवहारहेतुः काल इति मूले आदिना अनागतादिपरिग्रहः

महाकाशादीनि व्यवहारस्य भावः ३=

अविभुपरिमाणवत्त्वं मूर्तत्वमिति विवक्षितो नातो मन इत्यत आह तन्मतमिति २=

हः अतीतत्वं वर्त्तमानध्वंसप्रतियोगित्वं वर्त्तमानत्वमिह प्रकृतप्रयोगाधिकरणकालवृत्तित्वम् ।
भविष्यत्वं च वर्त्तमानप्रागभावप्रतियोगित्वं अत्र सर्वत्र कालस्य घटकतया प्रकृतप्रयोगारूपाऽ।
तीतादिव्यवहारे हेतुत्वं तस्येति ध्येयं न च तादृशव्यवहारः सूर्यपरिस्पंदादिरूपोपाधिमा
दायापि संभवतीति वाच्यं अनुगतव्यवहारस्याऽनुगतविषयं विनाऽसंभवेनाऽतिरिक्तकालस्वी
स्वातिरिक्तसर्वाधारत्वं ...ः ५= कारादिति दिक् सर्वाधार इति कालिकसंबंधेनेत्यादिः अत्र विभिन्नकालिकयोराधारा ऽऽ क्रियापदार्थयोः ५=
धेयभावविरहात् क्रियादेः सर्वाधारत्वशंकैव नाऽवतरतीति भावः प्राच्यादिव्यवहार ।
हेतुरिति मूले आदिना प्रतीच्यादिपरिग्रहः उदयाचलसन्निहितमूर्तावच्छिन्नादिक् प्रा
ची तद्व्यवहितमूर्तावच्छिन्ना च प्रतीची मेरुसन्निहितमूर्तावच्छिन्नादिगुदीची तद्व्यवहि
तमूर्तावच्छिन्ना तु दक्षिणा ज्ञानाधिकरणमिति समवायेन ज्ञानवदित्यर्थः तत्र ।

नत्स० ह्री
ष०१६

तयोमध्ये दीपिकायां नित्यज्ञानाधिकरणत्वमिति नच नित्यं विज्ञानमानन्दं ब्रह्मेत्यादि
श्रुत्याविरोध इति वाच्यं आनन्दपदस्यानन्दवदर्थकतया ऽऽद्यविज्ञानपदस्यापि विज्ञानवदर्थ
कतायाः स्वीकारेणाविरोधात् नचानन्दपदस्यैव तादृशार्थकत्वमसिद्धमिति वाच्यम् अर्श
आद्यजित्यजन्तत्वांगीकारेण तादृशार्थसिद्धेः अन्यथा नपुंसकत्वानुपपत्तेः अत्रानन्दो
जातःपः भाग्यापगमे सुखी संवृत्तोहमितिवद्दुःखाभावे उपचर्यते नवीनास्तु नित्यसुखमीश्वर
स्यांगीकुर्वतां लाघवमधिकं जल्पनेन अरूपिद्रव्यत्वादिति वायुप्रत्यक्षे त्वं तु उद्भूतरूपस्य
हेतुत्वादिति भावः आत्मसुखादिव्यतिरिक्तेति विजातीयात्ममनस्संयोगस्य हि रूपस्यमा
नसप्रत्यक्ष[illegible]तोश्वरे अभावादिति भावः प्रमाणत्वादिति नचेदमप्रयोजकमिति
शंक्यं कार्य[illegible]च्छिन्नं प्रति कृतित्वावच्छिन्नस्य हेतुत्वे नाप्रयोजकत्वासंभवादिति

वैजात्यं च परात्मवृत्तितद्
व्यरूपं बोध्यम् [illegible]
परमात्मवृत्तितत्सुखावच्छि
न्नात्मवृत्तितद्वोध्यम् [illegible]
संयोगः

अंगीकुर्वतामित्यनेन[illegible]हीतं जन्यत्व[illegible]नसुखत्वेन कार्य[illegible]कारणभावानुपपत्तिः
सुखत्वस्य नित्यवृत्तित्वेन कार्य[illegible]कत्वात् न[illegible]सुखत्वस्य कार्यतावच्छे

नहि नैनत्वविधकार्यकारणभावानुपपत्तिरिति वाच्यं
[illegible] धर्मसंयोगकार्यकारणभावेत्यर्थः

[illegible]

१६